# नृसिंहविरचिता बन्धकौमुदी

-सं. विजयशीलचन्द्रसूरि

काव्यालंकार शास्त्रमां एक विभाग चित्रकाव्यो अथवा बन्धकाव्योनो छे, अने ते सहृदय भावकोने घणो रस अने चमत्कृति पमाडे तेवो छे. आ विषयने निरूपतो एक नानकडो ग्रन्थ अत्रे प्रस्तुत छे : बन्धकौमुदी. आना प्रणेता नृसिंह नामे कवि छे, जेमना स्थळ समय जाणवानुं कोई साधन अत्यारे मारा पासे हाथवगुं नथी. प्रतिनो लेखन संवत १८ मो शतक होवानुं श्री पुण्यविजयजीए निर्देशेलुं छे.

आ ग्रंथनी हस्तप्रति अमदावाद कीका भटनी पोळना भंडारमां हती, जेनी फोटोस्टेट नकल आगमप्रभाकर मुनिराज श्री पुण्यविजयजी पासे हती. तेओए ते नकल, चित्र काव्य-विषयना समर्थ ज्ञाता अने मारा मित्र-कवि मुनिराज श्रीधुरंधरविजयजीने, वर्षो पूर्वे, संपादनार्थे आपी राखेली. तेमणे ताजेतरमां ते नकल मने संपादित करी प्रकाशनार्थे सोंपी, तेना आधारे आ ग्रंथ संपादन पूर्वक अत्रे रजू थाय छे.

प्रति ३ पत्रनी छे. लिपि जैन नागरी छे, अने वळी शुद्धप्राय छे. जे ते बन्धनी आकृति पण (कुल १६) आपेली छे. प्रान्ते लेखकनी पुष्पिका नथी, ते जोतां आ प्रति कर्तानो स्वहस्त होय तो ते असंभवित नथी.

मध्य कालमां आपणे त्यां खास करीने जैन मुनिगणमां - चित्र काव्योनी रचनाप्रवृत्ति खूब विकसित हती, तेनो ख्याल ते काळनां चित्रकाव्यो तथा तेनी आकृतिओनां पानां भंडारोमां जोईए त्यारे आवी शके छे. आ बधां काव्योनो मात्र संचय थाय तो पण एक-बे मोटा दलदार ग्रंथो थाय, तेटली सामग्री - कोई उद्धारकनी प्रतीक्षामां - भंडारोमां सचवाई पडी छे. आजे तो आ विषयनुं खेडाण अने अध्ययन आपणे त्यां नहिवत बन्युं छे, एटले आ विषय थोडो कठिन पण बन्यो जणाय छे. श्री धुरंधरविजयजी महाराज, उपर निर्देश्युं तेम, आना अधिकारी विशेषज्ञ छे, तेओ ध्यान आपे तो आ अढळक सामग्रीनो उद्धार थाय, अने अभ्यासीओने घणुं मार्गदर्शन पण मळी रहे. अस्तु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६ आकृतिओ पण सुविधा खातर पाछळ एकी साथे आपवामां आवी छे. तेमां क्यांक क्षति होय तेम लाग्युं छे, परंतु मूळ प्रतिमां जेम छे, तेमज लगभग रहेवा दीधुं छे.

## नृसिंहविरचिता

## बन्धकौमुदी

नमस्तस्मै नृहरये, संसारार्णवसेतवे ।
भक्तिनम्रजनानन्दसन्दोहविधिहेतवे ॥
केषाञ्चिदिह बन्धानां लक्ष्यदृष्ट्या(ष्ट्य)नुसारतः ।
लक्षणं श्लक्ष्णमस्माभिर्बालबोधविवृद्धये
यथामति नृसिंहेन, क्रियते बन्धकौमुदी ॥ ३ ॥

तत्राऽऽदौ **पद्मबन्धे**-सर्वपदाद्यो वर्णः स एवान्त्यः, तथा श्लोक-प्रथमपादादौ अन्त्यवर्ण(:) पादान्ते च वर्णत्रयं अनुलोमप्रतिलोमात्मकम् । प्रथमपादान्ते द्वितीयपादादौ च वर्णत्रयं गतागतम् । तथा तृतीयपादान्ते च चतुर्थपादादौ च वर्णत्रयं गतागतम् । एवं चेत् पद्मबन्ध : ॥

वरतात महादेव वदेहान्ते तनो शिव ।
वशिनो लोकपालांव [1]बलापाकृन्नु[2]तारव ॥ १ ॥ [3]प्रस्तारस्तु ॥

**कलशबन्धे** - यो द्वितीयो वर्णः स एव चतुर्थः, यः षष्ठ : स एव सप्तमः, यश्चैकादशः स एव श्लोकान्तश्च । द्वितीयपादान्ते यदक्षरद्वयं प्रतिलोमविलोमेन तृतीयपादादौ कर्त्तव्यम् । उत्तरार्द्धे यः षष्ठः स एव द्वादशः । एवं चेत् कलशबन्धः ॥

गौरी गिरीन्द्रजा जाततनुभा भात धीरसा ।
सा रराजेह विविधं या विद्युद्युतिसप्रभा [4]॥२॥

**शङ्खबन्धे** - यश्चाद्यो वर्ण : स एव द्वितीयः, यः पञ्चमः पूर्वार्ध्दे स एवाष्टमः, यः षष्ठः स एव नवमः । त्रयोदशचतुर्दशपञ्चदशषोडश(शा)श्चत्वारो वर्णाः प्रतिलोमेन तृतीयपादादौ कर्तव्याः । तृतीयपादान्ते यदक्षरद्वयं तच्चतुर्थपादादौ

---

१. बले दैत्यमप(पा)करोतीति स इन्द्रस्तेन नुतस्तत्र सम्बोधनम् इति प्रतिपार्श्वे टि. ।
२. शब्दगोचरः । ३. आकृति १ । ४. आकृति २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिलोमेन कर्तव्यम् । प्रथमे पादे पञ्चमो यो वर्णः स एव चतुर्थपदान्त्य(:) अन्यद् यथाप्रशस्तमेव शङ्खबन्धे ॥

यथा - ससत्यजयदेहाय देहारूढरसानघ ।
घनसार नमस्तेह हस्तेशूलाऽखिला श्रिय[1] ॥ ३ ॥

**छत्रबन्धे**-द्वितीयपादान्त्यो वर्णः स एव तृतीयपादादौ चतुर्थपादान्ते च कर्त्तव्यः । तृतीयपादे यश्चतुर्थ (:) स एव पञ्चमः, यश्चाष्टमः स एव नवमः, यश्च द्वादशः स एव त्रयोदशः । अन्यद् यथाप्राप्तम् । एवं चेच्छत्रबन्धः ॥

यथा - युष्माकं भूतये भूयात्सा भवानी भवप्रिया ।
या तु देववपुर्भाग-गमिता स्वस्वरूपया ॥ ४॥[2]

छत्रबन्धान्तरे-यो द्वितीयपादान्त्यो वर्णः स एव तृतीयपादादौ च चतुर्थपादान्ते च कर्त्तव्यः । तथा तृतीयपादादौ वर्णत्रयमनुलोमप्रतिलोमात्मकम् । तथा अन्तिमं च वर्णत्रयमपि चेच्छत्र बन्धान्तरे ॥

यथा - शिवेन जगतां सैषा, गौरी सकलसंमता ।
[3]तारिका कारिता मामा, या या मातास्तु तत्सुता ॥ ५ ॥

**शूलबन्धे**- य आद्यो वर्णः स एव तृतीयः पञ्चमश्च; द्वितीयपादान्त्यो वर्णो य : स एव तृतीयपादाद्यः, तत्पञ्चमश्चतुर्थपादान्त्यश्च कर्त्तव्यः । तथा तृतीयपादे यः षष्ठः स एव सप्तमः अष्टमश्च, चतुर्थपादे वर्णद्वयं अनुलोमप्रतिलोमात्मकम् । एवं चेच्छूलबन्धः ॥

यथा - सर्वसत्त्वसमं वेद्मि, त्वामीशं नाशितक्लम ।
[4]मदमोदमना नाना, नाम साररसा दम[5] ॥ ६ ॥

**धनुर्बन्धे**-प्रथमपादादौ यदक्षरद्वयं अनुलोमात्मकं तच्चतुर्थपादान्ते प्रतिलोमात्मकं कर्त्तव्यम् । तथा द्वितीयपादान्ते अक्षरद्वयं अनुलोमं तृतीयपादान्ते प्रतिलोमेन स्यात् । तथा प्रथमपादान्तवर्णद्वयमनुलोमं द्वितीयपादादौ द्वितीयपादान्ते च यद्वर्णद्वयं तदनुलोमप्रतिलोमरूपम् । एवं चेद्धनुर्बन्धो भवेत् ॥

---

१. आकृति ३. । २. आकृति ४. । ३. रक्षिका इति प्रतिपार्श्वे टि ।
४. मदो नुद्यते छिद्यतेऽनेनेति मदनो दमनो यस्य इति प्रति प्रार्श्वे टि. ।
५. आकृति. ५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा – रक्ष त्वं धृतसद्भूते, भूतेश भुवनत्रयम् ।
यन्त्रप्रायमिदं भोगिभोगिभूषसदक्षर ॥ ७[1]॥

**शरबन्धे**–प्रथमपादाद्यो वर्णो यः स एव तृतीयः पञ्चमश्च, यः सप्तमः स एव द्वितीयपादाद्यः तृतीयश्च, यः प्रथमपादान्त्यः स एव द्वितीयपादे द्वितीयः, यो द्वितीयपादे पञ्चमः स एव सप्तमः तृतीयपादाद्यश्च, द्वितीयपादे य : षष्ठः स एवाष्टमः, तृतीयपादान्त्यो यः स एव चतुर्थपादे चतुर्थोऽन्त्यः षष्ठश्च, चतुर्थपादाद्यो यः स एव तृतीयः पञ्चमश्च चतुर्थपादे स च सप्तमः । एवं चेत् शरबन्धः ॥

यथा – सदासविसरपत्र पत्रपङ्क्तिकगतागता ।
गत एवोस्त्वपात्रासा यालयासानसा नसा ॥ ८[2] ॥

**छुरिकाबन्धे**–प्रथमपादे यो द्वितीयो वर्णः स एव चतुर्थः षष्ठो, योऽष्टमः स एव तृतीयपादाद्यः चतुर्थपादान्त्यश्च कर्त्तव्यः । द्वितीयपादे प्रथमवर्णद्वयमनुलोम–प्रतिलोमात्मकं तृतीयपादान्त्यो वर्णः यः स एव चतुर्थपादाद्यः कर्त्तव्यः ॥

यथा – श्रितायताद्भुता भान्ता मुमामामुदपापद ।
तात त्वं वहसीशान नन्तव्यापि जगन्मता ॥ ९[3] ॥

छुरिकाबन्धान्तरे द्वितीयपादेऽक्षरद्वयं यमकरूपम् । पुनरप्यक्षरद्वयं यमकरूपम् । असावपि छुरिकाबन्धो भवति ॥

यथा – क्लेशपाशवशस्थाय देवदेवप्रियप्रिय ।
यच्छ सौख्यं महादेव वन्द्य मह्यं सदाश्रय ॥१०[4]॥

**अन्यच्छुरिकाबन्धान्तरे** द्वितीयचतुर्थषष्ठाक्षराण्येकरूपाणि । अष्टमः द्वादशस्तृतीयपादान्तश्चतुर्थादिश्च अमी एकरूपाः । तथा द्वितीयपादाद्यो य स एव तृतीयः यो द्वितीयपादान्त्यः स एव तृतीयपादाद्यः चतुर्थपादान्त्यश्च, तृतीयपादे यः सप्तमः स एव चतुर्थे द्वितीयः ॥

यथा – सा राजराजराजाज वाजवाजशिखिश्रितम् ।
[तं] यामायप्रभावाज जवाभाजनयत्सुतम् ॥ ११[5] ॥

षोडशकोष्ठागाराणि कृत्वा प्रथमपङ्क्तौ कोष्ठचतुष्टये चत्वार्यक्षराणि लिखेत् ।

---

१. आकृति. ६ ।   २. आकृति ७. ।   ३. आकृति. ८. ।   ४. आकृति ९. ।
५. आकृति १०. ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

द्वितीयपङ्क्तिकोष्ठेषु चत्वार्यक्षराणि लिखेत् । तृतीयपङ्क्तिकोष्ठेषु चत्वार्यक्षराणि लिखेत् । चतुर्थपङ्क्तिकोष्ठेषु चत्वार्यक्षराणि लिखेत् । पश्चाद् यथाक्रमेण वाचयित्वा पुनरुत्तरार्द्धं तिर्यग्वाचयेत् । तच्चोत्तरार्द्धं भवति । तत्र प्रथमपादाद्यक्षरं तृतीयपादाद्यं भवेत् । द्वितीयं उत्तरार्ध्दं पञ्चमं भवति तृतीयं चतुर्थपादाद्यं चतुर्थं, चतुर्थपादे पञ्चमम् । पुनः द्वितीयपङ्क्तिप्रथमकोष्ठस्थं पञ्चममक्षरं उत्तरार्द्धे द्वितीयं अष्टमाक्षरं उत्तरार्धेऽपि षष्ठं सप्तममुत्तरार्द्धे दशमं अष्टमं चतुर्थपादे षष्ठम् । पुनस्तृतीयपङ्क्तिप्रथमकोष्ठस्थं उत्तरार्धे तृतीयं द्वितीयमुत्तरार्द्धे सप्तमम् । यो वर्णः पूर्वार्द्धे एकादशः चतुर्थः उत्तरार्द्धे । पुनश्चतुर्थपङ्क्तिप्रथमकोष्ठस्थमुत्तरार्द्धे चतुर्थं द्वितीयमष्टमं तृतीयं द्वादशं चतुर्थं उत्तरार्द्धे अन्त्यम् । एवं पूर्वार्द्धस्य षोडशवर्णा यावन्तः तावन्त उत्तरार्द्धे योजनीयाः । एवं चेज्जालबन्धो भवेत् ।

यथा - देवधीरहराश्रीरा जाताभाजननागते ।
देहजानवराताना धीश्रीभाग रराजते ॥ १२[1] ॥

**जालबन्धान्तरे** पूर्वार्द्धे यत्तदेव पुनरभ्यसेत् पादचतुष्टये । एवं चेत् जालबन्धान्तरम् । तत्र द्वात्रिंशत्कोष्ठागाराणि कृत्वा तत्र प्रथमपङ्क्तेरष्टसु कोष्ठेषु प्रथमपादस्याष्टवक्षराणि लिखेत् । द्वितीयपङ्क्तिकोष्ठेषु पुनः वाचयेत् । पुनरेकान्तरितत्वेन प्रथमपङ्क्तिद्वितीयपङ्क्तिगताक्षराणि वाचयेत् ॥

यथा - सोमालङ्कृतगात्राया समानाकृत्यगात्मया ।
सोमालङ्कृतगात्राया समानाकृत्यगात्मया ॥ १३[2] ॥

**गोमूत्रिकाबन्धे** पूर्वार्द्धे आद्यो यः सोऽन्य एव भवेत् । यः पूर्वार्द्धे द्वितीयः स उत्तरार्धे द्वितीयः, यश्चतुर्थः स उत्तरार्द्धे चतुर्थः, यः षष्ठः स उत्तरार्द्धे षष्ठः, योऽष्टमः स उत्तरार्द्धेऽष्टमः, यो दशमः स उत्तरार्द्धे दशमः, यो द्वादशः स उत्तरार्द्धे द्वादशः यश्चतुर्दशः स उत्तरार्द्धे चतुर्दशः, यः षोडशः, स उत्तरार्द्धे षोडशः । प्रातिलोम्येन उत्तरार्द्धस्याक्षराणि वाचनीयानि ।

यथा - नमस्ते कालकण्ठाय, कमलाकान्तकप्रिय ।
समताकारकप्राय, विमलाकाशलक्षप ॥ १४[3] ॥

---

१. आकृति ११.  २. आकृति १२.  ३. आकृति १३.

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**सर्वतोभद्रे** – चतुःषष्ठिकोष्ठागाराणि कृत्वा तत्र प्रथमपङ्क्तिकोष्ठाष्टके प्रथमपादाक्षराणि अष्टौ लिखेत् । द्वितीयपादाक्षराणि द्वितीयपङ्क्तिकोष्ठेषु लिखेत् । तृतीयपङ्क्तिकोष्ठेषु तृतीपादाक्षराणि, चतुर्थे चतुर्थपादाक्षराणि लिखेत् । पञ्चमपङ्क्तिकोष्ठेषु चतुर्थपादाक्षराणि, षष्ठपङ्क्तिकोष्ठेषु तृतीयपादाक्षराणि, सप्तमपङ्क्तिकोष्ठेषु द्वितीयपादाक्षराणि, अष्टमपङ्क्तिकोष्ठेषु प्रथमपादाक्षराणि लिखेत् । प्रथमपादाद्यो यः स एव तृतीयपादे तृतीयः । आद्यपादे यो द्वितीयः स एव द्वितीयपादाद्यः, यस्तृतीयः स एव द्वितीयपादे तृतीयः । तृतीयपादे प्रथमो यः स एव तृतीयपादे द्वितीयः, प्रथमे चतुर्थः स एक चतुर्थपादाद्यो, यो द्वितीयपादे द्वितीयः स एव तृतीये चतुर्थः चतुर्थे तृतीयश्च । यो द्वितीये चतुर्थः स एव चतुर्थे द्वितीयः । पादचतुष्टयेऽपि प्रतिपादकं वर्णचतुष्टयमनुलोमप्रतिलोमात्मकम् । एवं सर्वतोभद्रं भवेत् ॥

यथा – वामासानि निसामावा मानासाध्वध्वसानमा ।

सासावामा सासावासा (सासावाननवासासा) निध्वनत्यत्यनध्वनि ॥१५[1]॥

द्वितीयः प्रथमो वर्णः पदे युग्मांह्रिपूर्वजः ।

द्वितीयांह्रितृतीयो यः स तृतीयद्वितीयकः ॥ १६ ॥

सर्वतोभद्रलक्ष्यैतदवादीद् **राजशेखरः** ।

प्रस्तारस्तु तथा प्रोक्तः तथाप्यर्थोऽपि विस्तृतः ॥ १७ ॥

वामं कौटिल्यं अस्यति क्षिपतीति वामासा ।

चन्द्रप्रभावविशदं चन्दनातिरतिप्रदम् ।

प्रभातिनन्दपद्रेशं प्रवरप्रकटं यशः ॥ १८[2] ॥

यापात्यपायपतितानवतारिताया

यातारितायपतिवाग्भुवितानिमाया ।

यामानितावपतु वो वसुसास्यगेया ।

यागेस्यसासुररिपोर्जययात्यपाया ॥ १९[3] ॥

**रुद्रटालङ्कारात्** कमलबन्धान्तरम् ॥

**इति श्री नृसिंहविरचितो बन्धकौमुदीग्रन्थः समाप्तोऽयम् ॥**

---

१. आकृति १४. । २. आकृति १५. । ३. आकृति १६. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकृति १



चक्रबन्धः॥

आकृति २



कलशबन्धः॥

आकृति ४



खड्गबन्धः॥

आकृति ३



[illegible]

आकृति ६



धनुर्बन्धः॥

आकृति ५



शूलबन्धः॥

आकृति ७



शरबन्धः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकृति ८



छुरिकाबन्धः॥

आकृति ९



छुरिकाबन्धः॥

आकृति १०



छुरिकाबन्धः॥

आकृति ११

| | | | |
|---|---|---|---|
| दे | व | धी | र |
| ह | म | श्री | म |
| जा | ता | भा | ज |
| नं | मा | ग | ते |

जालबन्धः॥

आकृति १२

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| सो | मा | लं | कृ | त | गा | त्रा | या |
| स | मा | ला | कृ | त्य | गा | त्म | या |
| सो | मा | लं | कृ | त | गा | त्रा | या |
| स | मा | ला | कृ | त्य | गा | त्म | या |

जालबन्धः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकृति १३



गोमूत्रिकाबन्धः॥

आकृति १४

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| वा | मा | सा | नि | नि | सा | मा | वा |
| मा | न | सा | ध्व | ध्व | सा | न | मा |
| सा | सा | वा | न | न | वा | सा | सा |
| नि | ध्व | न | न्य | न्य | न | ध्व | नि |
| नि | ध्व | न | न्य | न्य | न | ध्व | नि |
| सा | सा | वा | न | न | वा | सा | सा |
| मा | न | सा | ध्व | ध्व | सा | न | मा |
| वा | मा | सा | नि | नि | सा | मा | वा |

सर्वतोभद्रबन्धः॥

आकृति १५



सर्वतोभद्रबन्धः॥ ([illegible])॥

आकृति १६

कमलबन्धः ([illegible]) ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org